अथ विवाह पद्धति

188वां पुष्प

मार्ग प्रदर्शिका नामक टीका सहित
अखिल तंत्र स्वतंत्र पं. जमोतारामात्मज
कवितार्किक ज्योतिष शास्त्रनिष्णात
पं. ज्ञानचन्द्र द्वारा निर्मित

— संशोधक —

पं. कल्याण दास (पुष्टिकर) पुष्करणा लाहौर वाले

तथा


पं. माया राम जी शास्त्री

अध्यक्ष सनातन धर्म सभा मंदिर लाजपत नगर नई दिल्ली

सुकेत (सुन्दर नगर हिमाचल) के अधिपति
राजाधिराज श्री लक्षित सेन जी M.A. विशारद
तथा अनेक भाषाओं के प्रवक्ता,
ब्राह्मण ग्रन्थों तथा वैदिक कर्मकाण्ड के महान्
विद्वान के करकमलों में सादर समर्पित

मूल्य 6.50

प्राप्ति स्थान : C-25 Green Park Extension, New Delhi-16



अनने प्रीयतां तातो जमीतारामपण्डितः।
जनको मे ब्रह्मलोके न्यायवेदान्तकेसरी ॥

॥ ओं श्रीगणेशाय नमः ॥



अथ विवाहपद्धतिः

तत्र कन्याहस्तेन षोडशहस्तपरिमितं मण्डपं विधाय, तद् दक्षिणस्यां दिशि पश्चिमां दिशमाश्रित्य, मण्डपसंलग्नमुत्तराभिमुखं कौतुकागारं विदध्यात्।

घर के आंगन में लड़की[1] के सोलह हाथ ज़मीन मापकर चौकोन मण्डप[2] बनाए यानी (चार हाथ लम्बा और चार हाथ चौड़ा) उस मण्डप के दक्षिण की तरफ पश्चिममें, यानी नैर्ऋत्य कोण में मण्डप के साथ उत्तर की तरफ है मुख जिसका ऐसा कौतुकागार बनावे।

---

१. कन्याहस्तेन मण्डपं कुर्यात् वरहस्तेन वेदिकाम्। इति [पराशरः]

२. यज्ञोत्सवविवाहेषु विधायादौ च मण्डप।म्
विवाहोत्सवयज्ञेषु मण्डपं कल्पयेत सुधीः।
सर्वविघ्नविनाशाय सर्वेषां चित्ततुष्टये॥ इति ब्रह्मपुराणे।

मण्डपाद् बहि-रैशान्यां दिशि जामातृचतुर्ह-स्तपरिमितां सिकतादिपरिष्कृतां तुषकेशशर्करा-दिरहितां शून्यवेणुनिर्मितां आम्रपत्रादिशोभितां सुवस्त्राच्छादितां वेदीं च कारयेत् ।

मडण्प[1] से बाहर ईशान कोण में यानी (पूर्व और उत्तर के मध्य की कोण में) वर के चार हाथ के बराबर जमीन मापकर (यानी एक हाथ लम्बी और एक हाथ चौड़ी) साफ रेत की बनी हुई, तिनके[2], बाल और कंकरों से रहित, लाठियों से बंनी हुई, आम के पत्तों से सजी हुई और सुन्दर वस्त्र के चंदोये से ढकी हुई वेदी को बनाए ।

विवाहदिने कृतनित्यक्रियेण जामातृपित्रादौ मातृपूजापूर्वकं आभ्युदयिकं[3] कर्तव्यं कन्या पिता च शुचिः स्नात्वा शुक्लांबरधरः कृतनित्यक्रियो मातृपूजाभ्युदयिकं कुर्यात् ।

---

१. कश्यपपराशरौ—मण्डपाद् बहिरीशान्यां सदा कुर्याच्चवेदिकाम् ।
अग्न्यर्थं च विवाहादौ कृतादि त्रियुगेषु वै ।।
कलौ संकोचतः कुर्याद् बहिर्वेदीं च मण्डलात् ।

विवाहादौ लिखेन्नित्यं तिलकं नाम मण्डलम् । कात्यायनसंहितायाम् ।
गृहारामप्रतिष्ठायां दुर्गाहोमे नवग्रहे ।
सर्वतोभद्रकं कुर्यात् विवाहे तिलकं लिखेत् ।। ब्रह्मपुराणे
विघ्नराजो भवेद् यत्र मध्ये नान्यस्तु कश्चन ।
सुमहत् सुन्दरं चैव तिलकं नाम मण्डलम् ।। स्मृतिचन्द्रोदये

२. तुषस्तु धान्यत्वचि विभीतके । इति हेमचन्द्रः ।

३. उक्तकाले विवाहांगं कुर्यात् नान्दी मुखं पिता ।
देशान्तरे विवाहश्चेत्तत्रगत्वा भवेदिदम् ।। इति रेणुकाकारः

अस्मद देशे विवाहदिने नान्दीमुखश्राद्धस्य प्रचारो नास्ति अतः 'विवाहे दश वासराः' इति प्रमाणेन विवाहदिनात् पूर्वमेव नान्दीश्राद्धं कुर्यात् ।।

विवाह के दिन नित्य क्रिया (सन्ध्या और अपने इष्टदेव का पूजन) करके दामाद के पिता को सबसे पहले गौर्यादि षोडशमातृकाओं के पूजन के बाद नान्दीमुख श्राद्ध करना चाहिये। कन्या का पिता शौचादि से पवित्र हो स्नान कर, शुद्ध वस्त्रों को धारण कर सन्ध्योपासन आदि नित्य कर्मों को करके षोडश मातृपूजा के बाद नान्दीमुख श्राद्ध करे।

अथ अर्हणवेलायां मण्डपे यजमानः सपत्नीक उत्तरमुखउपविश्य कुशासने वरः प्राङ्मुख उपविश्य आचम्य, स्वस्तिवाचनं कृत्वा प्रतिज्ञा संकल्पं कारयेत्।

इसके बाद लग्न के समय लड़की का पिता अपनी स्त्री[1] के साथ उत्तर[2] की ओर मुख करके कुशा के आसन पर बैठे और वर पूर्व को ओर मुख करके बैठे, आचमन करें। स्वस्ति वाचन के बाद यजमान प्रतिज्ञा संकल्प करे, इसके बाद वर भी प्रतिज्ञा संकल्प करे।

---

१. जातके नामके चैव ह्यन्नप्राशनकर्मणि।
तथा निष्क्रमणे चैव पत्नी पुत्रश्चदक्षिणे॥
गर्भाधाने पुंसवने सीमन्तोन्नयने तथा।
वधुप्रवेशने चैव पुनः सन्धान एव च॥
प्रदाने मधुपर्कस्य कन्या दाने तथैव च।
कर्मस्वेतेषु वै भार्यां दक्षिणे तूपवेशयेत्॥
आशीर्वादेऽभिषेके च पादप्रक्षालने तथा।
शयने भोजने चैव पत्नी तूत्तरतो भवेत्॥ संस्कारदीपके
सीमन्ते च विवाहे च तथा चातुर्थ कर्मणि।
मखे दाने व्रते श्राद्धे पत्नी दक्षिणतो भवेत्॥

२. सर्वत्र प्राङ्मुखो दाता प्रतिग्राही उदङ्मुखः।
एष एव विधिर्यत्र कन्यादाने विपर्ययः॥ संस्कारभास्करे
प्रत्यङ्मुखं स्थापयेत्तु देवं पूज्यं वरं विना।
वरस्तु प्राङ्मुखः पूज्यः पूजकः स्याद् उदङ्मुखः॥ व्याससमतौ

ओं विष्णुर्विष्णुर्विष्णुः तत् सदद्य मासोत्तमे मासे (महीने का नाम) मासे(पक्ष का नाम)पक्षे शुभतिथौ ('तिथि का नाम) यथा योगकरणमुहूर्तनक्षत्रोपेतायां— (वार का नाम) वासरान्वितायां (गोत्र का नाम) गोत्रोत्पन्नः सपत्नीकोऽहंश्रुत्याद्युक्तफलावाप्तिकामोऽवगताऽनवगताऽनेकजन्माधिकरणककायवाङ्मनस्कृतकोटिशोमहापापोपपापशमनपूर्वकश्रीयज्ञपुरुषनारायणप्रीतिपुरस्सरयावज्जीवपुत्रपौत्रप्रपौत्रादिसकलकुटुम्बसहितात्मीयकलेवरानामयदीर्घायुष्ययुक्तधनधान्यसमृद्धिविशिष्टबहुतरसुखभोगावाप्त्यनंतरशतसहस्रशोऽश्वमेधराजसूयगृहमेधज्योतिष्टोमाग्निष्टोमादियागकोटिशःसूर्यग्रहणकालीनबहुतरब्राह्मणसम्प्रदानकदशगुणोत्तरधेन्वनडुद्यानवाजिसर्वस्यसम्पूर्णं सर्वरत्नोपशोभितसर्वपृथ्वीदानजन्यपुण्यप्राप्त्युत्तरैतत्कन्याशरीरावस्थितरोमसमसंख्ययुगसहस्रावच्छिन्नपरमानन्दभोगास्पदावाप्तिसहितत्रिदिववासोत्तरकल्पकोटिशतावलीढब्रह्मलोकमहत्तत्त्वोत्तरश्रीविष्णुलोकवासकामनया अनेन वरेणास्यांकन्यायामुत्पादयिष्यमाणसन्तत्याद्वादशावरान्द्वादशपरान् पुरुषांश्च पवित्री कर्त्तुं

आत्मनश्च श्रीलक्ष्मीनारायणप्रीतये ब्राह्मार्षप्राजापत्यान्यतमविवाहविधिनाकन्यादानमहं करिष्ये ॥ तन्निर्विघ्नपरिसमाप्तिकामोगणपत्यादिपूजनंवरपूजनं च यथासम्भवमहं करिष्ये ॥

वेदादि में कथित फल प्राप्ति की इच्छा वाला, ज्ञात और अज्ञात अनेक जन्मों के शरीर वाणि और मन से किये करोड़ों महापाप और उपपापों की शांति के लिए श्री यज्ञपुरुषनारायण की प्रीति के लिए जीवन पर्यन्त पुत्र पौत्र प्रपौत्रादि सकल कुटुम्ब के साथ अपने शरीरारोग्य और दीर्घ आयु धन धान्य समृद्धि से युक्त बहुत अच्छे सुख भोगों की प्राप्ति के अनन्तर सैकड़ों हज़ारों अश्वमेध राजसूय गृहमेध ज्योतिष्टोम आदि यज्ञों के फल की प्राप्ति के लिए करोड़ों सूर्य्यग्रहण के समय बहुत ब्राह्मणों को दिये गये दश-गुण अधिक फल वाले धेनु, बैल, बाग, घोड़े, सारी खेतियों से सम्पूर्ण सारे रत्नों से सुशोभित सारी पृथ्वी के दान से पैदा होने वाले पुण्य की प्राप्ति के लिए इस कन्या के शरीर के रोमों की संख्या के समान सहस्रों युगों तक निरन्तर परमानन्द भोग की प्राप्ति सहित स्वर्गवास के बाद करोड़ों कल्पों तक ब्रह्मलोक और महतलोक की प्राप्ति के अनन्तर श्रीवैकुण्ठ लोकवास की कामना से इस कन्या में पैदा होने वाली सन्तान से बारह पूर्व और बारह उत्तर पुरुषों को तथा अपने आप को पवित्र करने के लिए श्री लक्ष्मीनारायण की प्रसन्नता के लिये ब्राह्म[१], आर्ष[२], प्राजापत्य[३], इन तीनों में से किसी एक विवाह की विधि से मैं कन्या दान करता हूँ और उस विवाह के निर्विघ्न समाप्ति की इच्छा से यथा सम्भव वस्तुओं से गणपत्यादि और वर पूजन करता हूँ ।

---

१. ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता ।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥ इति याज्ञवल्क्यस्मृतौ ।

२. यत्र पुनर्गोमिथुनमादाय कन्या दीयते स आर्षः । इति मिताक्षरायाम् ।

३. इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने ।
स कायः पावयेत्तज्जः षट् षड् वंश्यान् सहात्मना ॥ इति याज्ञवल्क्यस्मृतौ ।

ओं विष्णुर्विष्णुर्विष्णुः तत् सदद्य मासोत्तमे मासे (महीने का नाम) मासे (पक्ष का नाम) पक्षे शुभतिथौ (तिथि का नाम) यथायोगकरणमुहूर्तनक्षत्रोपेतायां [वार का नाम] वासरान्वितायां (गोत्र का नाम) गोत्रोत्पन्नोऽहं

श्रीलक्ष्मीनारायणप्रसादकरणकयावज्जीवं पत्न्या सह ऽऽयुरारोग्यसंपत्तिसमृद्धिपूर्वकपरमसुखप्राप्तये धर्मार्थकामसिद्ध्यर्थं सत्संस्कारस्वकीयोद्वाह-कर्माहंकरिष्ये॥ तन्निर्विघ्नपरिसमाप्तिकामो गणपत्यादीन्यथालब्धोपचारैरर्चयिष्ये ।

मैं लक्ष्मीनारायण की प्रसन्नता से यावज्जीवन पत्नी के साथ आयु आरोग्य सम्पत्ति समृद्धि के लिए परम सुख प्राप्ति के लिए धर्म अर्थ काम की सिद्धि के लिए विवाह संस्कार से अपना विवाह कर्म करता हूँ और निर्विघ्न समाप्ति की इच्छा से गणपत्यादियों का यथा प्राप्त उपचारों से पूजन करता हूँ । इसके बाद वर और यजमान गणेश ओंकार षोडशमातृका नवग्रह और सर्प आदि का पूजन करे ।

लड़की का पिता वर के दहने गोडे पर अपना दहना हाथ रखकर इस मन्त्र को पढ़े—

---

१. कुलं च शीलं च सनाथता चविद्या च वित्तं च वपुर्वयश्च ।
वरे गुणान् सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम् ॥ इति वसिष्टः ।
सितकुष्टिन्यपस्मारे ब्रह्मघ्ने राजयक्ष्मणि ।
अन्धे च परिवित्तौ च बधिरे दूरदेशगे ॥
व्यसनासक्तचित्ते च न देया कन्यका बुधैः । इति चण्डेश्वरः ।
नात्यासन्ने नातिदूरे नात्याढ्ये नाति दुर्बले ।
वृत्तिहीने च मूर्खे च षट्सु कन्या न दीयते ॥
दूरस्थानामविद्यानां मोक्षधर्मानुवर्त्तिनाम् ।
शूराणां निर्धनानां च न देया कन्यका बुधैः ॥ इति वसिष्टः ।
काममामरणं तिष्ठेत् गृहे कन्यर्तुमत्यपि ।
न त्वेनां प्रयच्छेत गुणहीनाय कर्हिचित् ॥ इति नारदः ।

ओं साधु भवानास्तामर्च्चयिष्यामो भवन्तम् ।

(भवान्) आप (साधु) बड़े आराम से (आस्ताम्) बैठिये हम (भवन्तम्) आप का (अर्च्चयिष्यामः) पूजन[1] करेंगे ।

वर कहे—

ओं अर्चय ।

(पूजन कर[2])

लड़की का पिता वर के बैठने के लिए शुद्ध आसन देवे, इसके बाद पण्डित विष्टरे को हाथ में ले यह कहे—

ओं विष्टरो विष्टरो विष्टरः[3] ।

(यह विष्टर है यह विष्टर है यह विष्टर है ।)

पण्डित के हाथ से यजमान विष्टर अपने हाथों में लेकर यह पढ़े—

ओं विष्टरः प्रतिगृह्यताम् ।

(आप विष्टर लीजिये ।

यजमान के हाथ से विष्टर लेकर वर यह पढ़े—

ओं विष्टरं प्रतिगृह्णामि ।

(मैं विष्टर को लेता हूं ।)

---

१. सिंहासनं सुवर्णादि धातुना निर्मितं शुभम् ।
दारुभिर्निर्मितं चाथ शरैर्वा शुद्धमासनम् ।। पराशरः

२. षडर्घ्या भवन्ति :—आचार्य ऋत्विग् वैवाह्यो राजा प्रियस्नातकः ।।
(इति पारस्करगृह्यसूत्रे)

ननु प्रश्ने अर्चयिष्याम इत्यस्य वहुवचनान्तत्वात्
उत्तरे 'अर्चय' इत्येकवचनमसमञ्जसमितिचेन्न
'प्राधान्येन व्यपदेशा भवन्ति' इति शेखरवचनेन एक वचनमपि साधु ।

३. पूजको यजमानस्तु दत्वादौ शुद्धमासनम् ।
तस्योपवेशनार्थं तु विष्टरं प्रददेत्पुनः ।।

आचारत्वाद् एव प्रतिपादित नैष विधिः ।

दोनों हाथों[1] से विष्टर[2] को पकड़ कर लड़का इस मन्त्र को पढ़े ।
(मन्त्रों के विनियोगों[3] की विवाह में आवश्यकता नहीं)

वर्ष्मोऽस्मिसमानाना-मुद्यता मिव सूर्यः ।
इमं त मभि तिष्ठामियो मां कश्चाभिदासति॥

(उद्यताम्) उदय होने वाले नक्षत्रादियों के मध्य में (सूर्यः) सूर्य की (इव) तरह (समानानाम्) अपने बराबर वालों में (वर्ष्मः) श्रेष्ठ (अस्मि) हूँ इसलिए (यः) जो (कः) कोई (मां) मेरा (अभिदासति) तिरस्कार करेगा (तम्) उस पुरुष को (इमम्) इस विष्टर की तरह (अभि) नीचा करके (तिष्ठामि) मैं ऊपर बैठता हूँ ।

इस मन्त्र को पढ़कर उत्तर की तरफ है मुख जिसका ऐसे विष्टर को आसन के ऊपर रख खुद उस पर बैठ जाए (यानी उसे जांघों के नीचे दबा ले) फिर पण्डित अरघे में जल डालकर इस मन्त्र को पढ़े—

ओं पाद्यं पाद्यं पाद्यम् ।

(पैर धोने के लिए[4] जल है । पैर धोने के लिए जल है । पैर धोने के लिए जल है)

फिर पण्डित जल से भरा हुआ अरघा यजमान को देवे । यजमान उसे पकड़ कर यह कहे—

ओं पाद्यं प्रतिगृह्यताम् ।

(आप पैर धोने योग्य जल लीजिये ।)

---

१. यजमानार्पितमुभाभ्यां पाणिभ्यां मध्ये वरो गृह्णाति (इति जयरामः)
२. पञ्चाशता भवेद् ब्रह्मा तदर्धेन तु विष्टरः । ऊर्ध्व केशो भवेद् ब्रह्मा लम्बकेशस्तु विष्टरः ॥ दक्षिणावर्तको ब्रह्मा वामावर्तस्तु विष्टरः ॥
३. अग्निहोत्रे वैश्वदेवे विवाहादि विधौ तथा ।
होमकाले न दृश्यन्ते प्रायच्छन्दर्षि देवताः । (नारदीय कर्मागंपद्धितौ)
४. पादार्थमुदकं पाद्यं 'पादार्घाभ्याञ्चेति' सूत्रेण यत् ।
पादार्थमुदकं कोष्णं ताम्रपात्रे च संस्थितम् ।
तेन प्रक्षालयेत् पादं विधिना च ततः परम् ॥ इति आपस्तम्भः
सत्ये स्वर्णमयं पात्रं त्रेतायां रौप्यमेव च ।
द्वापुरे त्रपुजं पात्रं कलौ लोहं तु शस्यते ।
ताम्रपैत्तलिकं लोहमौपलश्च द्विजादितः ।
पात्र पाद्यजलायोक्त ताम्रं वा सर्वत्रकम् ॥ इति व्यासः

यजमान के हाथ से अरघा लेकर वर इस मन्त्र को पढ़—

ओं पाद्यं प्रतिगृह्णामि ।

(मैं पैर धोने योग्य जल को लेता हूँ ।)

लड़का अपना पैर आगे करे और खुद जल को डाले और यजमान पैर को धोवे, पैर धोते समय पण्डित[1] इस मन्त्र को पढ़े ।

नोट—ब्राह्मण का[2] पहले दाहिना पैर और फिर बायां, क्षत्री का पहले बायां और फिर दायां धोवे ।

ओं विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः ।

हे जल तुम (विराजः[3]) भगवान् के (दोहः) सार (असि) हो इसलिये (विराजः) भगवान् के सार तुमको (अशीय) मैं ग्रहण करता हूँ (विराजः) भगवान् का (दोहः) सार तू इस समय (मयि) मेरे विषय में (पाद्यायै) चरणों के धोने[4] के योग्य बनो ।

पण्डित अपने हाथ में जल से भरा हुआ अरघा लेकर यह मंत्र पढ़े—

ओं पाद्यं पाद्यं पाद्यम् ।

फिर पंडित जल से भरा हुआ अरघा यजमान को देवे और यजमान उसे पकड़ कर यह कहे—

ओं पाद्यं प्रतिगृह्यताम् ।

यजमान के हाथ से अरघा लेकर वर इस मन्त्र को कहे—

---

१. मन्त्रोच्चारणकाल एव पादप्रक्षालनं कर्त्तव्यम्, नतु मन्त्रान्ते ।

२. ब्राह्मणो दक्षिणं पादं पूर्वं प्रक्षालयेत् सदा ।
क्षत्रादि प्रथमं सव्यमिति धर्मानुशासनम् ।। इति पद्मपुराणवचनात् ।

३. यतः पुराणेष्वपि विराट् पुरुषशरीरादेव जलोत्पत्तिर्निरूपिता ।
आपो नारा इति प्रोक्ता आपो हि नरसूनवः ।।

४. मच्चरण प्रक्षालनयोग्यं भवेत् ।

ओं पाद्यं प्रतिगृह्णामि।

लड़का अपना पैर आगे करे और खुद जल को डाले। यजमान इस प्रकार दूसरे पैर को धोवे और धोते समय पंडित इस मन्त्र को पढ़े—

ओं विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः।

फिर पंडित अपने हाथों में दूसरा विष्टर ले इस मंत्र को कहे—

ओं विष्टरो विष्टरो विष्टरः।

पंडित के हाथों से यजमान विष्टर को अपने हाथों में लेकर यह पढ़े—

ओं विष्टरः प्रतिगृह्यताम्।

यजमान के हाथ से विष्टर लेकर वर यह पढ़े—

ओं विष्टरं प्रतिगृह्णामि।

दोनों हाथों से विष्टर को पकड़कर लड़का इस मन्त्र को पढ़े—

वर्ष्मोऽस्मि समानाना मुद्यता मिव सूर्यः।
इमं त मभितिष्ठामि यो मां कश्चाभिदासति।

इस मन्त्र के पढ़ने के बाद उत्तर की तरफ है अग्रभाग जिसका ऐसे विष्टर को पैरों के नीचे रक्खे।

कुशा, चावल, सुपारी, फूल और चन्दन को लेकर अरघे में डालकर और उस अर्घपात्र[1] को अपने हाथ में रखकर पंडित इस मंत्र को पढ़े—

---

१. अर्घशब्देन उदकपात्रं एव। इति कर्काचार्य्यः।
कुशचन्दनपुष्पाणि चाक्षता उदकं तथा।
पयोदधि तथा रुक्ममष्टाङ्गोऽर्घः करग्रहे॥
जलं दधि घृतं क्षीरं बदरीतण्डुलास्तिलाः।
सिद्धार्थकास्तथा दर्भा अर्घोऽष्टांगः प्रकीर्तितः॥
"इति पुराणे ब्रह्मवाक्येनार्घलक्षणमुक्तम्"
कांस्यपात्रं भवेद् विप्रे स्वर्णपात्रं तु भूमिपे।
रौप्यपात्रं भवेद् वैश्ये लोहपात्रं च शूद्रके॥

ओं अर्घो अर्घो अर्घः ।

(यह अर्घ है यह अर्घ है यह अर्घ है ।)

पंडित के हाथ से इस जल पुष्प सहित अरघे को लेकर यजमान इस मन्त्र को कहे—

ओं अर्घः प्रतिगृह्यताम् ।

(आप अर्घ लीजिये ऐसा यजमान वर को कहे)

यजमान के हाथ से अर्घपात्र लेकर वर यह कहे—

ओं अर्घं प्रतिगृह्णामि ।

(मैं अर्घ लेता हूँ ।)

ऐसा कह कर यजमान के हाथ से अर्घपात्र को लेकर वर इस मन्त्र को पढ़े—

ओं आपः स्थ युष्माभिः सर्वान् कामान् अवाप्नवानि ।

हे जल देवता तुम (आपः) दूध, दधि, घी, फलादियों में (स्थ) विद्यमान हो इसलिये मैं (युष्माभिः) तुम्हारे से (सर्वान्) सब (कामान्) कामनाओं को (अवाप्नवानि) पाऊँ ।

वर[1] इस मन्त्र को पढ़े और अर्घपात्र में से कुछ चावल फूल कुशा इत्यादि को अपने सिर पर रख ले ।

वर अर्घपात्र के जल को पूर्व और उत्तर की कोण में छोड़ता हुआ इस मन्त्र को पढ़े—

ओं समुद्रं वः प्रहिणोमिस्वां योनिमभिगच्छत ।
अरिष्टास्माकं वीरा मा परासेचि मत् पयः ॥

---

१. तथा च पराशरः ।
गृहीत्वार्घं वरस्तस्मात् पुष्पं दत्त्वा स्व मूर्द्धनि ।
करयुग्मेन तं भूयो मौलिपर्यन्तमानयेत् ॥

हे जलो (वः) तुम को (समुद्रं) समुद्र की तरफ (प्रहिणोमि) पहुँचाता हूँ, इसलिये (स्वां योनिं) अपने जन्म स्थान समुद्र की तरफ (अभि-गच्छत) जाओ (अस्माकम्) हमारे (वीरा) वीर (अरिष्टा) कष्टों से रहित हों (पयः) और यह मंगल जल (मत्) मुझ से (परासेचि) मत दूर हो ।

पंडित अरघे में जल डालकर अपने हाथ में ले और इस मंत्र को पढ़े—

ओं आचमनीयं आचमनीयं आचमनीयम् ।

(यह आचमन[१] करने योग्य जल है यह आचमन करने योग्य जल है यह आचमन करने योग्य जल है ।)

पंडित जल का अरघा यजमान को देवे और वह इस मंत्र को पढ़े—

ओं आचमनीयं प्रतिगृह्यताम् ।

(आप आचमन करने योग्य जल को लीजिए)

लड़का अरघे को यजमान से लेकर यह मन्त्र पढ़े—

ओं आचमनीयं प्रतिगृह्णामि ।

(मैं आचमन करने योग्य जल को लेता हूँ ।)

नीचे लिखे मन्त्र को पढ़कर एक आचमन करे फिर दो बार चुपचाप आचमन करे ।

ओं आमागन् यशसा स ँ सृजवर्चसा तं मा कुरु प्रियं प्रजाना मधिपतिं पशूना मरिष्टं तनूनाम् ।

---

१. उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं चापि तथा विधम् ।
हस्तौ पादौ च प्रक्षाल्य आचमनेन स शुध्यति ।।
माषमात्रसुवर्णस्य यत्र मज्जति वै मणिः ।
एतदाचमनं प्रोक्तं पवित्रं कायशोधनम् ।।
पूताभिः प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः ।
त्रिवारमद्भिराचामेद् द्विजादिः शुद्धिहेतवे ।। (इत्याचार चंद्रोदये)
अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः ।
हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः ।

हे जलेश (मा) मुझ को (यशसा) यश से (आमागन्[1]) युक्त करो (वर्च्चसा) ब्रह्मतेज से (संसृज) युक्त करो (प्रजानाम्) पुत्र पौत्रादिकों का (प्रियम्) प्रेमपात्र (कुरु) करो (पशूनाम्) पशुओं का (अधिपतिम्) स्वामी करो (तनूनाम्) शरीरधारियों को (अरिष्टम्) रोग रहित करो।

पंडित कांसी के बर्तन में शहद,[2] दही और घी को डालकर ऊपर कांसी के बरतन से ढक दे और इस मन्त्र को पढ़े—

ओं मधुपर्कों मधुपर्कों मधुपर्कः।

(यह मधुपर्क है यह मधुपर्क है यह मधुपर्क है।)

यजमान मधुपर्क के पात्र को पंडित के हाथ से लेकर इस मंत्र को पढ़े—

ओं मधुपर्कः प्रतिगृह्यताम्।

(आप मधुपर्क लीजिये।)

वर यजमान के मान के लिये इस मन्त्र को कहता है।

ओं मधुपर्कं प्रतिगृह्णामि।

(मैं मधुपर्क ग्रहण करता हूँ।)

इस मन्त्र से यजमान के हाथ से मधुपर्क लेवे नहीं, क्योंकि अगले मंत्र में यजमान के ही हाथ में मधुपर्क[3] देखना लिखा है इसलिए यजमान मधुपर्क

---

१. आङ्पूर्वो गम्लृगतौ इति धातुस्तस्यरुपम्।
आमेत्यव्ययं सहार्थे॥

२. पलमेकं घृतं चैव द्विपलं दधि प्रोच्येते।
पलमेकं मधुकुर्यान् मधुपर्कविधिःस्मृतः॥
दध्यलामे पयो ग्राह्यं मध्वलाभे तु शर्करा।

३. स्मृतिसारमहार्णव प्रभृतिषु यद् उक्तम्—
रोमभिस्तु भवेत् कुष्टी मक्षिकाभिर्दरिद्रिता।
कीटकैश्च भवेदन्धस्तदर्थं हि निरीक्षणम्॥
गवां दुग्धे तु रोमाणि घृतमध्ये तु मक्षिकाः।
मधौ च कीटकाः स्युर्वै तदर्थं हि निरीक्षणम्॥
मधुपर्कनिरीक्षणेऽदृष्टमपिफलम्—
पुंभिश्च यत्कृतं पापं बाल्ययौवनवार्द्धके।
तत्सर्वं नाशयेत् पापं मधुपर्कोऽवेक्षणात्॥

के ढकने को उतार दे और वर से कहे कि आप इसे देखिये । वर दाता के हाथ में ही इस मधुपर्क को देखे और इस मन्त्र को पढ़े—

ओं मित्रस्य त्वा चक्षुषा प्रतीक्षे ।

हे मधुपर्क ! मैं (त्वा) तुझको (मित्रस्य) सूर्य के अथवा मित्र के (चक्षुषा) नेत्रों से (प्रतीक्षे) देखता हूँ ।

इस मन्त्र को पढ़कर वर मधुपर्क को दोनों हाथों से लेवे और बाएँ हाथ पर रक्खे—

ओं देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि ।

हे मधुपर्क (त्वा) तुमको (सवितुः) सूर्यनारायण की (प्रसवे) आज्ञा से (अश्विनोः) अश्विनी कुमारों की (बाहुभ्याम्) भुजाओं से (पूष्णः) आदित्य के (हस्ताभ्याम्) हाथों से (प्रतिगृह्णामि) में ग्रहण करता हूँ ।

इस मन्त्र को पढ़कर अनामिका (छोटी अंगुली के साथ की अंगुली) से तीन बार आलोडन करे (अनामिका को ३ बार फेर कर उसे एकरस करे) और अनामिका और अंगुष्ठ से पृथ्वी पर तीन बार गेरे और गेरते समय तीन बार ही इस मन्त्र को पढ़े—

ओं नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि ।

हे जठराग्ने (श्याव) काले पीले (आस्याय) मुखावली जो तू है (ते) तेरे लिये (नमः) नमस्कार है (ते) तुम्हारे (अन्नशने) खाने योग्य मधुपर्क में (यत्) जो (आविद्धम्) निषिद्ध है (तत्) उसको (निष्कृन्तामि) मैं निकालता हूँ ।

इस मन्त्र को पढ़कर यजमान से तीन बार दिए हुए मधुपर्क को वर खाये और प्रत्येक बार इस मन्त्र को पढ़े—

ओं यन्मधुनो मधव्यं परम ँ रूप मन्नाद्यम् । तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्नादोसानि ।

हे देवताओ (मधुनः)शहद का (यत्) जो (रूपम्) रूप है वह (मधव्यम्(मीठा है (परम्) उत्तम है (अन्नाद्यम्) अन्न की तरह खाने योग्य है (अहम्) में (तेन) उस (मधुनः) शहद का जो कि (मधव्येन) मीठा (परमेण) उत्ताम (रूपेण) रूप वाला (अन्नाद्येन) अन्न की तरह खाने योग्य (परमः) पवित्र और (मधव्यः) मधुपर्क[1] के योग्य है (अन्नादः) उस उत्तम अन्न का भोक्ता (असानि) बनूं ।

बचा हुआ मधुपर्क पृथ्वी में जहां पाद न आवें वहां गेर देवे इसके बाद कुरला और फिर आचमन करे और इस मन्त्र को पढ़कर दाएँ हाथ की लम्बी तीन उँगलियों से वर मुख का स्पर्श करे ।

ओं वाङ् मे आस्येऽस्तु ।

(मे) मेरे (आस्ये) मुख में (वाक्) वाणी (अस्तु) हो इस मन्त्र को पढ़कर वर तर्जनी और अंगुष्ठ से नासिका स्पर्श करे ।

ओं नसोर्मे प्राणोऽस्तु ।

(मे) मेरी (नसोः) नासिका में (प्राण[2]) श्वास (अस्तु) हो ।

---

१. मधुपर्के च सोमे च अप्सु प्राणाहुतिषु च ।
दन्तलग्ने इक्षुलग्ने नोच्छिष्टो भवति द्विजः ।
ताम्बूलेक्षुफले चैव भुक्तस्नेहानुलेपने ।
मधुपर्के च सोमे च नोच्छिष्टं मनुरब्रवीत् ।।
पुत्रायान्तेवासिने वोत्तरासीनायोच्छिष्टं दद्यात् सर्वं वा,
प्राश्नीयात् प्राग् वा संचरे निनयेत् । इति सूत्राणि ।
आचार्यः शिष्याय ऋत्विक् प्रियपुत्राय वरतातौ सर्वं ।
प्राश्नीयतां राजा संचरेदेशे पूर्वस्यां दिशि निनयेत् ।। इति जयरामः ।

२. हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले ।
उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः ।। सिद्धान्तचन्द्रोदये ।

इस मन्त्र को पढ़कर वर मध्यमा और अंगुष्ठ से नेत्रों का स्पर्श करे–

ओं अक्ष्णोर्मे चक्षुरस्तु ।

(मे) मेरे (अक्ष्णोः) नेत्रों में (चक्षुः) देखने की शक्ति (अस्तु) हो ।

इस मन्त्र को पढ़कर वर अनामिका और अंगुष्ठ से कर्णों का स्पर्श करे—

ओं कर्णयोर्मे श्रोत्रमस्तु ।

(मे) मेरे (कर्णयोः) कानों में (श्रोत्रम्) सुनने की शक्ति (अस्तु) हो ।

इस मन्त्र को पढ़कर वर कनिष्टका और अंगुष्ठ से भुजाओं का स्पर्श करे–

ओं बाह्वोर्मे बलमस्तु ।

(मे) मेरी (बाह्वोः) भुजाओं में (बलम्) ताकत (अस्तु) हो ।

इस मन्त्र को पढ़कर वर सारी अंगुलियां मिलाकर दोनों जंघाओं का स्पर्श करे–

ओं ऊर्वोर्मे ओजोस्तु ।

(मे) मेरी (ऊर्वोः) जंघाओं में (ओजः) ताकत (अस्तु) हो ।

इस मन्त्र को पढ़कर वर दोंनों हाथों से सिर से लेकर पैर तक स्पर्श करे—

ओं अरिष्टानि मे अङ्गानि तनूस्तन्वा मे सह सन्तु ।

(मे) मेरे (तनूस्तन्वा) शरीर के (अङ्गानि) समस्त अङ्ग (सह) एक बार ही (मे) मेरे लिये (अरिष्टानि) रोग रहित (सन्तु) हों ।

यजमान इस मन्त्र को कहे—

ओं गौर्गौर्गौः ।

(गौ है गौ है गौ है ।)

वर और यजमान दोनों दो कुशाओं की सरियों को एक तरफ से यजमान पकड़े और दूसरी तरफ से वर और फिर वर इस मन्त्र को पढ़ें–

ओं माता रुद्राणां दुहिता वसूना ७ं स्वसादित्यानाममृतस्य नाभिः । प्रणवोचं चिकितुषे जनाय मा गा मनागामदितिं वधिष्ट मम[1] चामुष्य[2] पाप्मा हतः ॥

हे गोमाता आप (रुद्राणाम्) ग्यारह रुद्रों की (माता) माता हो (वसूनां) आठ वसुओं की (दुहिता) लड़की हो (आदित्यानां) बारह आदित्यों की (स्वसा) बहन हो (अमृतस्य नाभिः) आपकी नाभि में अमृत है इसलिए मैं (चिकितुषे) ज्ञान वाले (जनाय) यजमान के लिए (प्रणवोचं) कहता हूँ कि मेरी प्रसन्नता के लिए आप (अनागाम्) अपराध से रहित (अदितिं) न मारने योग्य (गाम्) गौ को (मा) मत (वधिष्ट) मारो (च) और यह गौ (मम) मेरे (च) और (अमुष्य) उस यजमान के (पाप्मा) संपूर्ण पापों को (हतः) दूर करे ।

इस मंत्र को ऊंचे स्वर से पढ़कर यजमान और वर ने जो कुशा पकड़ी है उसको पृथ्वी पर रख दे—

ओं उत्सृजत तृणानि अत्तु ।

(उत्सृजत) छोड़ता हूं (तृणानि) घास को (अत्तु) खाओ ।

१—(वर का नाम) शर्मणः / वर्मणः—गुप्तस्य वरस्य ।

२—(यजमान का नाम) शर्मणः / वर्मणः—गुप्तस्य यजमानस्य उभयोः ।

अस्मिन् मन्त्रे केचित् गवालम्भनं कथयन्ति परन्तु कलियुगे एतत् न, तथाहि—
न परंप.तकं घोरं कलौ गोहत्यया समम् । इति मनुः

गोमेधो नरमेधश्च विवाहे गोर्वधस्तथा ।
परक्षेत्रे सुतोत्पत्तिः कलावेतानि वर्जयेत् ॥ इति पराशरः

अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु । इति याज्ञवल्क्यस्मृतौ ।
अश्वालम्भं गवालम्भं सन्यासं पलपैतृकम् ।

देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेत् ॥

ततो वेदिकायां तुषकेशशर्करादि रहितायां हस्तमात्रपरिमितायां[1] चतुरस्रां भूमिं कुशैः परिसमुह्य[2] तान् कुशान् ऐशान्यां परित्यज्य गोमयोदकेन[3] उपलिप्य स्रुवेण स्फेन वा प्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्य[4] उल्लेखन क्रमेण अना-

---

१—नित्यं नैमित्तिकं काम्यं स्थण्डिले वा समाचरेत् ।
हस्तमात्रेण तत् कुर्याद् बालुकाभिः सुशोभनम् ।। शारदातिलके

२—त्रिभिर्दर्भैर्महाराज पांसूनामपसारणम् ।
परिसमूहनं चैव विज्ञेयं कर्मकोविदैः ।। इति व्यासवचनम्
कृमिकीटपतंगाद्या भ्रमन्ति वसुधातले ।
तेषां संरक्षणार्थाय कुर्यात् परिसमूहनम् । कुशकण्डिकाभाष्ये

३—वरुणो देवता मूत्रे गोमये हव्यवाहनः ।
सोमः क्षीरे दध्निवायुर्घृतेरवि रुदाहृतः ।।
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकमेकं पावनीयं मांगल्ये शुभकर्मणि ।। इति देवलः
अत्यन्तजीर्णदेहाया वन्ध्यायाश्च विशेषतः ।
रोगार्त्तनवसूताया न गोमयमुपाहरेत् ।। इति धर्मशास्त्रवचनम् ।
पुरा इन्द्रेण वज्रेण हतो वृत्रोमहासुरः ।
मेदसा व्यापिता भूमिस्तदर्थमुपलेपनम् ।। इति कुशकण्डिकाभाष्ये ।।
जलाशयादन्त्यजाद्यैः कारितादस्थिचर्मभिः ।
कृमिकीटादिभिर्दुष्टान् नैवोदक मुपाहरेत् ।।
कृमिहीनं सुवर्णस्थं मलमूत्राद्यदूषितम् ।
सुस्वादु शुद्ध संस्थानादुदकन्तु समाहरेत् ।।
कूपात् प्रस्रवणात् खातात् सरसो देवप्रग्रहात् ।
नद्यादि संगसात्तीर्था दुदकं समुपाहरेत् ।।

४—स्वर्गमर्त्यपातालाश्च त्रिषु रेखासु संस्थितः ।
वैश्वानरः स्थितो यत्र होमे तत्र समागताः ।।
अंगुष्ठः पुष्टिदः प्रोक्तोऽनामिका धनदायिनी ।
द्वाभ्यां समुद्धृता रेखाः शुभदा वरकन्योः ।।

मिकाङ्गुष्ठाभ्यां उद्धृत्य जलेन अभ्युदय तत्र तूष्णीं कांस्यपात्रस्थवह्निं प्रत्यङ्मुखं समाधाय तद् रक्षणार्थं कंचिन् नियुज्य कौतुकागाराद् मातुलः कन्यामानीय मण्डपे कन्या द्वैमातुरोंकारलक्ष्मी कुबेरान् अर्चयेत् ॥

इसके बाद तुष केश कंकरादि से रहित एक हाथ लम्बी चौड़ी वेदी में चौकोन भूमि को कुशाग्रों से साफ कर उन कुशाग्रों को पूर्वोत्तर कोण में फेंककर गोबर और जल से लीपकर स्रुव या खंडाकारदण्ड से पूर्व की तरफ है अग्रभाग जिसका ऐसा प्रादेशमात्र (पसारे हुए अंगुष्ठ और तर्जनी के दरमियान लम्बाई को प्रादेश कहते हैं) दक्षिण से उत्तर की तरफ तीन रेखाओं को लिखकर लिखने के क्रम से अनामिका और अंगुष्ठ दोनों से मिट्टी को ऊपर उछाल कर जल छिड़क कर चुपचाप कांसी के बर्तन में अग्नि रखकर पश्चिमाभिमुख अग्नि को स्थापन कर उसकी रक्षा के लिए किसी को खड़ा करके मातुल[1] कौतुकागार से कन्या को लाकर बिठलावे मण्डप में कन्या गणेश ओंकार लक्ष्मी और कुबेर का पूजन करे।

तब यजमान वर के लिए चार वस्त्र देता है। धोती, तौलिया और दो मौली की तन्दे। वर उनमें से एक मौली के तन्द को लेकर इस मन्त्र को पढ़ता हुआ कन्या को अधोवस्त्र दे अर्थात् मौली की एक तंद उसके दाहिने जानु (घुटने) पर रख दे।

ओं जरां गच्छ परिधत्स्ववासो भवाऽऽकृष्टीनामभिशस्तिपावा। शतं च जीवशरदः सुवर्चा रयिं च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वासः॥

१—कौतुकागारात् कन्याऽऽनयनं वरकर्तृकं शास्त्रेण विधीयते परं पञ्चनद प्रदेशे तु मातुलः काचित् सौभाग्यवती वा स्त्री कौतुकागाराद् कन्यामानयति।

हे कन्ये ! तू (जराम्) निर्दोष वृद्धावस्था को मेरे साथ (गच्छ) प्राप्त हो और मेरे दिये हुए (वासः) वस्त्र को (परिधत्स्व) पहन (आकृष्टीनाम्)[1] कामादिकों से खैंचे हुए मनुष्यों के बीच में (वा) यकीनन (अभिशस्तिपाः) प्रमाद से अपने आपकी रक्षा करने वाली (भव) हो (च) और (शतं) सौ (शरदः) शरद ऋतु तक (जीव) प्राण धारण कर और (सुवर्चा) तेजवाली होकर (रयिम्) धन को (च) और (पुत्रान्) पुत्रों को (अनुसंव्ययस्व) पैदा कर और (आयुष्मति) हे आयुष्मति ! सम्पूर्ण आयु वाली (इदं) इस (वासः) कपड़े को (परिधत्स्व) पहन ।

वर दूसरी मौली की तंद को लेकर इस मंत्र को पढ़ता हुआ कन्या को उत्तरीयवस्त्र दे अर्थात् मौली की दूसरी तंद उसके दाहिने कन्धे पर रख दे ।

ओं या अकृन्तन् नवयन् या अतन्वत याश्च देवीस्तन्तूनभितो ततन्थ तास्त्वा देवीर्जरसे संव्ययस्वाऽऽयुष्मतीदं परिधत्स्व वासः ।

हे कन्ये ! (या) जिन (देवीः) देवियों ने (इदं) इस (वासः) वस्त्र को (अकृन्तन्) काता है (या) जिन्होंने (अवयवन्) तना है और (या) जिन्होंने (तन्तून्) सूत को (अतन्वत) फैलाया है (च) और जिन्होंने (अभितः) दोनों तरफ से (तन्तून्) सूत को (ततन्य) ओत प्रोत किया है अर्थात तुरीवेमा से बुना है (ताः) और इन सब कामों को करने वाली देवियां (त्वा) तुमको (जरसे) वृद्धावस्था तक जीने के लिये (संव्ययस्व) वस्त्र पहनावें इसलिये (आयुष्मति) हे आयुष्मति ! (इदम्) इस (वासः) वस्त्र को (परिधत्स्व) धारण कर । (वर धोती को लेकर अगले मंत्र को पढ़ता हुआ उसे अपने दाहिने जानु (गोडे) पर रखे) ।

१—आकृष्टीनाम इति प्रथमार्थे षष्ठी आकृष्टी भव मनोहरा भव ।

२—सदशं नूतनं वस्त्रं मंजिष्ठादि सुरंजितम् ।
अहतं तद् विजानीयादित्युक्तं पूर्वसूरिभिः ॥
ईषद् धौतं नवं श्वेतं सदशं यन्न धारितम् ।
अहतं तद् विजानीयात् सर्वकर्मसु पावनम् ॥
अधौतवस्त्रो यः कुर्यान्नित्यनैमित्तिकीं क्रियाम् ।
न क्रियाफलमाप्नोति वृथा तस्य परिश्रमः ॥

ओं परिधास्यै यशोधास्यै दीर्घायुष्ट्वाय जरदष्टिरस्मि शतं च जीवामि शरदः पुरुची रायस्पोषमभिसंव्ययिष्ये ।

हे वस्त्र के अधिष्ठातृ देवता (परिधास्यै) अनेक प्रकार के सुन्दर तथा शुभ वस्त्र धारण करने के लिये (यशोधास्यै) यश और कीर्ति के लिये (च) और (दीर्घायुष्ट्वाय) बहुत देर तक दोषरहित जीने के लिये मैं इस वस्त्र को (अभिसंव्ययिष्ये) धारण करता हूँ मैं कैसा हूँ वस्त्र अधिष्ठातृ देवता की कृपा से (जरदष्टिः) पूर्णायु वाला (अस्मि) हूँ फिर कैसा हूं (पुरुची) बहुत पुत्र धनों वाला हूं । वस्त्र कैसा है (रायपोषम्) धनकी पुष्टि करने वाला है । इस वस्त्र के सम्बन्ध से मैं (शतं) सौ (शरदः) शरद ऋतुओं तक (जीवामि) जीता रहूं ।

वर तौलिये को लेकर अगले मंत्र को पढ़ता हुआ उसे अपने दाहिने कन्धे पर रखे।

**ओं यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती ।
यशो भगश्च माऽविन्दत् यशो मा प्रतिपद्यताम् ।।**

हे वस्त्र के देवता (यशसा) यश वाले (द्यावापृथिवी) आकाश और पृथिवी (मा) मुझ को (अविन्दत्)[1] प्राप्त होवें (यशसा) यशवाले (इन्द्राबृहस्पती) इन्द्र और बृहस्पति (मा) मुझ को प्राप्त होवें (च) और (यशः) यशवाला (भगः) सूर्य्य (मा) मुझको (प्रतिपद्यताम्) प्राप्त हो ।

वस्त्र धारण करने के बाद वर और कन्या[2] दो दो आचमन करें । आचमन के बाद यजमान वर और कन्या को कहे कि तुम दोनों आपस में देखो

१—विभक्तिवचनव्यत्ययेनान्वयः । (अत्र खण्डान्वयः)

२—दशवर्षा भवेत् कन्या सम्प्रदाने वधूर्भवेत् ।
सांगुष्टग्रहणे भार्या पत्नी चातुर्थकर्मणि ।। नारदवचनम् ।

यजमान के ऐसा करने पर वर और कन्या आपस में देखें और वर इस मन्त्र को पढ़े—

ओं समंजन्तु विश्वे देवाः समापो हृदयानि नौ संमातरिश्वा संधाता समुदेष्ट्री दधातु नौ।

हे कन्ये (विश्वेदेवा:) सम्पूर्ण देवता तथा (समाप:) शुद्धजल (नौ) हम दोनों के (हृदयानि) हृदयों को (समंजन्तु) शुद्ध करे तथा (संमातरिश्वा) शुद्ध वायु तथा (संधाता) अनुकूल ब्रह्मा और (समुदेष्ट्री) गायत्री (नौ) हम दोनों के हृदयों में (दधातु) धर्म अर्थ काम और मोक्ष को स्थित करें।

(१) (पुरोहित कन्या के वस्त्र से वर के वस्त्र के साथ ग्रन्थिवंधन करे)

नोट—कई कई जातियों में पुरोहित लम्बी मौली को लेकर उसे यज्ञोपवीत की तरह वर के गले में डाल देते हैं और उस मौली के साथ कन्या के वस्त्र का ग्रन्थिबन्धन करते हैं और कई २ जातियों में १४ छुहारे और जुट्ट को कन्या की दाई कन्नी में बांध देते हैं और उस बँधे हुए जुट्ट छुहारों की पोटली से यज्ञोपवीत के सदृश वर के गले में पड़े मौली से ग्रन्थिबन्धन करते हैं। पुरोहित दो मौली की तन्दे कंकण बन्धन के लिये यजमान को दे। यजमान दो मौली की तन्दों को ले उनमें से एक तन्द को पहले कन्या के दाएं हाथ में नाले की गांठ के समान बांधे फिर दूसरी तन्द वर के दाएं हाथ में नाले की गांठ के समान बांधे।

१—पिता तु प्रेषणेनैव सम्मुखीकरणञ्चरेत्।
मन्त्रलिंगात्तु मन्त्रस्तु पठनीयो वरेण च ॥ सुमन्तुवचनम्
स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वारथ्योपसर्पणे।
आचान्तः पुनराचामेत् वासः परिधाय च ॥ योगियाज्ञवल्क्यः

२—पश्चनददेशे प्रायो यजमानापेक्षया पुरोहितेनाचार्येण वा ग्रन्थिबन्धनं क्रियते ॥

३—कन्यकासुदशे पार्श्वे द्रव्यपुष्पाक्षतानि च।
निक्षिप्यतानि संबद्धवा वरवस्त्रेण संयुजेत् ॥
योगियाज्ञवल्क्यः।

नोट—(२) इन कंकणों को खोलते समय पहले वर का कंकर्ण[1] खोलना फिर कन्या का ।

गोत्रोच्चारणम्

पुरोहित दो आटे के पेड़े बनाले एक पेड़े में दक्षिणा रख कर दूसरा पेड़ा उसके ऊपर धरे इस संपुट को लड़की के दाहिने हाथ पर रख दे और लड़की के बाएं हाथ से उसे ढक दें फिर लड़के का दायां हाथ नीचे और बायाँ ऊपर यानी लड़की के दोनों हाथ लड़के के हाथों के बीच हों और ऊपर मौली आदि लपेट दे फिर इसके बाद वर का पुरोहित गोत्रोच्चारण करे ।

करारविन्देन पदारबिन्दं,
मुखारविन्दे विनिवेशयन्तम् ।
वटस्यपत्रस्य पुटे शयानं,
बालं मुकुन्दं सततं स्मरामि ॥

किं गोत्रस्य (गोत्र का नाम) गोत्रस्य यथोक्त प्रवरस्य कात्यायन सुत्रिण: माध्यन्दिनी शाखिन: यजुर्वेदिन: (लड़के के पड़दादा का नाम)

शर्मण:[4]
——— प्रपौत्राय[3]
वर्मण:—गुप्तस्य

१—कन्यापूर्वे बन्धनं कंकणस्य वरं पूर्वं मोचनं सम्प्रदिष्टम् ।
कर्मादौ बन्धनं प्रोक्तं कर्मान्ते तद् विसर्जनम् ॥
पुमान् बध्नाति मन्त्रेण यदा वै दक्षिणे करे ।
वामे करे तदा प्रोक्तं स्त्रीणामपि बन्धनम् (विधानपारिजाते)
रक्षार्थं दक्षिणे हस्ते बध्नीयात् कंकणे तयो: । लघ्वाश्वलायने स्मृतिवचनम्

२—वर गोत्रं समुच्चार्य्य प्रपितामहपूर्वकम् ।
नामसंकीर्तयेत् विद्वान् कन्यायाश्चैवमेवहि ॥ ऋष्यश्रृंगवचनम् ।

३—शर्मान्तं ब्राह्मणस्योक्तं वर्म्मान्तं क्षत्रियस्यतु ।
गुप्तान्तं चैव वैश्यस्य दासान्त: शूद्र एव हि ॥

४—उच्चार: प्रातिलोम्येन पितृणां सर्वकर्मसु ।
कन्यादाने यज्ञवृताऽनुलोम्येन सस्मृत: ॥ (कारिकाकार:)

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रामाणपटवः कर्तेति नैयायिकाः
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वांछित फलं त्रैलोक्यनाथो हरिः

हनुमन्नाटके

किं गोत्रस्य (गोत्र का नाम) गोत्रस्य यथोक्तप्रवरस्य कात्यायन सूत्रिणः माध्यन्दिनी शाखिनः यजुर्वेदिनः (लड़के के दादा का नाम)

शर्मणः
———पौत्राय।
वर्मणः—गुप्तस्य

यस्यालीयत शल्कसीम्नि जलधिः,पृष्ठे जगन्मण्डलं।
दंष्ट्रायां धरणी, नखे दितिसुताधीशः पदे रोदसी॥
क्रोधे क्षत्रगणः शरे दशमुखः पाणौ प्रलम्बासुरः।
ध्याने विश्वमसावधार्मिककुलं कस्मैचिदस्मै नमः॥

साहित्यदर्पणे।

किं गोत्रस्य (गोत्र का नाम) गोत्रस्य यथोक्त प्रवरस्य कात्यायन सूत्रिणः माध्यन्दिनी शाखिनः यजुर्वेदिनः (लड़के के पिता नाम)

शर्मणः
———पुत्राय
वर्मणः—गुप्तस्य

लड़के का पुरोहित गोत्रोच्चारण के समाप्त होने पर चावल पुष्प इत्यादि को लेकर वर और कन्या के हाथों पर फेंके और इन शब्दों को कहे।

कन्या सौभाग्यवती भवतु, दीर्घायुर्भवतु वरः।

यजमान (कन्या पक्ष) का पुरोहित गोत्रोच्चारण करे—

या कुन्देन्दु तुषारहारधवला या शुभ्रवस्त्रावृता,

या वीणा वरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता।
सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा॥

किं गोत्रस्य (गोत्र का नाम) गोत्रस्य यथोक्तप्रवरस्य कात्यायन सूत्रिण: माध्यन्दिनीशाखिन: यजुर्वेदिन:—(लड़की के पड़दादा का नाम)

शर्मण: / वर्मण:—गुप्तस्य प्रपौत्रीम्

रक्तां रक्ताम्बरां रक्तगन्धमाल्यविभूषिताम्!
चतुर्भुजां त्रिनयनां माणिक्यमुकुटोज्ज्वलाम्॥
पाशांकुशाविक्षुचापदाडिमीपुष्पसायकान्।
दधानां बाहुभिर्नेत्रैर्दर्पणामोदशीतलैः॥

(मेरूतन्त्रेवज्रेश्वरीध्यानम्)

किं गोत्रस्य (गोत्र का नाम) गोत्रस्य यथोक्तप्रवरस्य कात्यायन सूत्रिण: मध्यन्दिनी शाखिन: यजुर्वेदिन: (लड़की के दादा का नाम) शर्मण: / वर्मण:-गुप्तस्य पौत्रीम्।

काली तारा महाविद्या षोडशी भुवनेश्वरी।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा॥
वगला सिद्धविद्या च मातङ्गी कमलात्मिका।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः॥

(मुण्डमालातन्त्रे)

किं गोत्रस्य (गोत्र का नाम) गोत्रस्य यथोक्तप्रवरस्य कात्यायन सूत्रिण: माध्यन्दिनी शाखिन: यजुर्वेदिन: (लड़की के पिता का नाम)--

शर्मण: / वर्मण:-गुप्तस्य पुत्रीम्

यजमान का पुरोहित गोत्रोच्चारण के समाप्त होने पर चावल पुष्प इत्यादि को लेकर वर और कन्या के हाथों पर फैंके और इन शब्दों को पढ़े—

कन्या सौभाग्यवती भवतु। दीर्घायुर्भवतु वरः।

इसके बाद उनके हाथों से वह पेड़े ले ले, इस विधि को पंजाबी में "हथ लेवें" और संस्कृत में "हस्तबन्ध" कहते हैं।

इस मन्त्र को यजमान पढ़ें—

दाताहं वरुणो राजा द्रव्यमादित्यदैवतम्।
वरोसौ विष्णुरूपेण प्रतिगृह्णात्वयं विधिः॥
रुद्ररूपेण

(अहम्) मैं (दाता) यजमान (वरुणः) वरुण (राजा) राजा हूँ और (द्रव्यम्) देने योग्य कन्या का (आदित्यदैवतम्) आदित्य देवता है। (विष्णुरूपेण, रुद्ररूपेण)[1] विष्णुरूप या रुद्ररूप (असौ) यह (वरः) वर (प्रतिगृह्णातु) ग्रहण करे (अयम्) यह (विधिः) विधान है।

—:o:—

कन्यादानम्

दाता शंख में जल, कुशा, चावल, सुपारी, पुष्प, चन्दन की लकड़ी को डालकर और उस शंख को अरघे या किसी और डोने आदि में रखकर कन्या के हाथ को शंख के साथ जोड़े और फिर पण्डित कन्या दान का संकल्प पढ़े।

नोट—कन्यादान के समय यजमान के दक्षिण की ओर स्त्री हो।

ओं विष्णुर्विष्णुर्विष्णुः तत् सदद्य मासोत्तमे

---

१. अत्र केचिदाहुः—ब्राह्मणजातीयो वरो विष्णुरूपः क्षत्रियश्च रुद्ररूपः, तन्न युक्तियुक्तमाभाति, वैश्यजातीयवरप्रयोजकशब्दाभावात्, केवलमत्र वरस्य शैवी दीक्षा किंवा वैष्णवी इत्येवार्थोऽभिप्रेतः।

मासे (महिने का नाम)' मासे (पक्ष का नाम) पक्षे शुभतिथौ (तिथि का नाम) यथायोगकरणमुहूर्तनक्षत्रोपेतायां (वार का नाम) वासरान्वितायां (गोत्र का नाम) गोत्रोत्पन्नः सपत्निकोऽहं ।

१—पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥
अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ ।
गम्यं त्व भावे दातॄणां कन्या कुर्यात् स्वयंवरम् ॥ इति याज्ञवल्क्यस्मृतौ

मास पक्षतिथीनां च निमित्तानां च सर्वशः ।
उल्लेखनमकुर्वाणो न तस्य फलभाग्वेत् ॥ हेमाद्रौ

कन्यादानसमारम्भे दाताशंखे समाददेत् ।
दूर्वाक्षफलं पुष्पं चन्दनं जलमेव च ॥ बृहत्पराशरः

कन्यादानात् परं दानं न भूतं न भविष्यति । इतिवचनात्

अश्वमेधः क्रतुवरो यथा यज्ञेषु चोत्तमः ।
एवं सर्वेषु दानेषु कन्यादानं प्रशस्यते ॥ इति गौतमः

अद्भिरेव द्विजाग्राणां कन्यादानं प्रशस्यते ।
इतरेषान्तु वर्णानामितरेतरकाम्यया ॥ मनुः

विनादर्भैश्च यत्स्नानं यच्च दानं विनोदकम् ।
असंख्यातश्च यज्जपं तत्सर्वं निष्फलं भवेत् ॥ अङ्गिराः

ननु—समस्तं दानादिकृत्यजातं दिवसेऽनुष्ठीयते, किमिति कन्यादानं रात्राविति चेच्छृणु-कन्यादानस्य रात्रावपि निर्दुष्टत्वात् तथा चात्र मनुर्भगवानाचष्टे—

"ग्रहणोद्वाह संक्रान्तिर्यात्रार्ति प्रसवेषु ।
स्नानदानादिकं कार्यं रात्रावपि न दुष्यति ॥

१—लड़के का पुरोहित पढ़े—

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़के के पड़दादे का नाम)

शर्मण: / वर्मण:-गुप्तस्य **प्रपौत्राय**

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़के के दादा का नाम)

शर्मण: / वर्मण:-गुप्तस्य **पौत्राय**

(गोत्र का नाम) **गोत्रस्य यथोक्त प्रवरस्य** (लड़के के बाप का नाम)

शर्मण: / वर्मण:-गुप्तस्य **पुत्राय**

२—लड़की का पुरोहित पढ़े—

(गोत्र का नाम) **गोत्रस्य यथोक्यप्रवरस्य** (लड़की के पड़दादा का नाम)

शर्मण: / वर्मण:-गुप्तस्य **प्रपौत्रीम्**

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़की के दादा का नाम)

शर्मण: / वर्मण:-गुप्तस्य **पौत्रीम्**

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़की के पिता का नाम)

शर्मण: / वर्मण:-गुप्तस्य **पुत्रीम्**

३—लड़के का पुरोहित पढ़े—

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़के के पड़दादे का नाम)

शर्मण: / वर्मण:-गुप्तस्य **प्रपौत्राय**

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़के के दादा का नाम) ।

शर्मण: / वर्मण:-गुप्तस्य **पौत्राय**

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़के के वाप का नाम

शर्मण: / वर्मण:-गुप्तस्य **पुत्राय**

४—लड़की का पुरोहित पढ़े—

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़की के पड़दादे का नाम) ।

शर्मण: / वर्मण:-गुप्तस्य **प्रपौत्रीम्**

गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़की के दादा का नाम)

शर्मण: / वर्मण:-गुप्तस्य **पौत्रीम्**

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़की के बाप का नाम) ।

शर्मण: / वर्मण:-गुप्तस्य **पुत्रीम्**

५—लड़के का पुरोहित पढ़े—

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़के के पड़दादा का नाम)।

शर्मणः / वर्मणः-गुप्तस्य **प्रपौत्राय**

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़के के दादा का नाम)।

शर्मणः / वर्मणः-गुप्तस्य **पौत्राय**

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़के के बाप का नाम)

शर्मणः / वर्मणः-गुप्तस्य **पुत्राय**

६—लड़की का पुरोहित पढ़े—

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़की के पड़दादे का नाम)।

शर्मणः / वमंणः-गुप्तस्य **प्रपौत्रीम्**

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़की के दादे का नाम)

शर्मणः / वर्मणः-गुप्तस्य **पौत्रीम्**

(गोत्र का नाम) **गोत्रस्य यथोक्तप्रवरस्य** (लड़की के बाप का नाम)।

शर्मणः / वमणः-गुप्तस्य **पुत्रीम्**

मम समस्तपितणां च समस्त-पापक्षय-पूर्वक-कल्पकोटि-शतावधि-निरतिशय-सानन्द-ब्रह्मलोक-महीयमानादि-यावज्जीव-पुत्रपौत्रादि सकलकुटुम्ब-सहितात्मीय-कलेवरानामय-दीर्घायुष्ययुक्त- धनधा-न्यसमृद्धि विशिष्ट-बहुतरसुखभोगावाप्त्यनंतशतसह-स्रशोऽश्वमेध-राजसूय-ग्रहमेध-ज्योतिष्टोमाग्निष्टो-मादियाग कोटिशोः दशगुणोत्तर-धेन्वऽनडुद्यान-रथ वाजिसर्वसस्यसंपूर्ण-सर्वरत्नोपशोभित-सर्वपृथ्वीदान-जन्य-समपुण्यप्राप्त्युत्तरैततकन्याशरीरावस्थित-रोमसमसंख्ययुगसहस्रावच्छिन्न-परमानन्दभोगा-स्पदावाप्तिसहितत्रिदिव वासोत्तर कल्पकोटि शता-वलीढश्रीविष्णुलोकवासकामनया अनेन वरेण अस्यां कन्यायाम् उत्पादयिष्यमाणसंतत्या द्वादशा-वरान् द्वादशपरान् पुरुषान् पवित्रीकर्तुम् आत्मनश्च श्रीलक्ष्मीनारायणप्रीतये च (लड़की के गोत्र का नाम)

प्रपितामहं समारभ्य गोत्र प्रवरादि संयुतम् ।
कुलसम्बन्धकरणं त्रिस्त्रिर्वारमुदीरणम् ॥
सम्बन्धानामु सर्वेषां योनिसम्बन्ध मुत्तमम् ।
अन्यत् क्रोधेन नश्येत् इदं तु न विनश्यति ॥ भृगुवचनम

गोत्रां यथोक्तप्रवरां (लड़की का नाम) **नाम्नीम् इमां कन्यां सुस्नातां यथाशक्त्यलंकृतां गन्धाद्यर्च्चितां वस्त्रयुगाच्छन्नां प्रजापतिदेवतां** (लड़के के गोत्र का नाम) **गोत्राय यथोक्त प्रवराय माध्यन्दिनीशाखाध्यायिने** (लड़के का नाम)

शमणे विष्णुरूपिणे ब्राह्मणाय वराय / वमणे रुद्ररूपिणे बाहुजाय वराय **पत्नित्वेन तुभ्यमहं संप्रददे ।**

कन्या दान के संकल्प के बाद यजमान शंखी जल सहित कन्या के दाएं अंगुष्ठ को वर के दाएं हाथ में देवे । वर उसी समय कहे—

ओं स्वस्ति ।

वर इस मन्त्र को पढ़ता हुआ कन्या के हाथ को ग्रहण करे—

ओं द्यौस्त्वा ददातु पृथिवीत्वा प्रतिगृह्णातु ।

कोई २ जातियें यहाँ पर हस्त लेपन भी करती हैं अर्थात् कन्या के हाथों पर हल्दी से लेप करती हैं ।

(द्यौः) आकाशरूप पिता (त्वा) तुम्हें (ददातु) देवे (पृथिवी) पृथिवी रूप वर (त्वा) तुम्हें (प्रतिगृह्णातु) ग्रहण करे ।

कन्या दान की दक्षिणा[2] के लिये यजमान स्वर्ण[3] की मुन्दरी को अरघे में डाले और पण्डित इस संकल्प को पढ़े—

ओं अद्य कृतैतत् कन्यादान-प्रतिष्ठार्थ-मिदं

१—ऊहः खल्वपि—न सैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेद मन्त्रा निगदिताः ।
ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः । महाभाष्यम्

दशाब्दसप्तमासाः त्रिदिनाधिक यदा भवेत् ।
कन्यानामान्तरं धृत्वा चोद्वाहमुपकल्पयेत् ॥

२—हतं यज्ञमदक्षिणम् ।

३—वेदोपनिषदे चैव सर्वकर्मसु दक्षिणा । सर्वत्र तु मयोद्दिष्टा भूमिर्गावोऽथ कांचनम् ।

बैजवापः—शिवनेत्रोद् भवं यस्माद्रजतं पितृवल्लभम् ।
अमंगलं तद् यत्नेन देवकार्येषु वर्जयेत् ॥
गोमिथुन वा दद्यत् ।

स्वर्णाङ्गुलीयक-मग्निदैवतं (लड़के के गोत्र का नाम) **गोत्राय यथोक्त-प्रवराय** (लड़के का नाम) शर्मणे / वर्मणे-गुप्तस्य **वराय दक्षिणा तुभ्यमहं संप्रददे ।** यह सोने की अंगूठी लड़के को देवे, लड़का इसे लेकर **ओं स्वस्ति** यह कहे और अपने दाएं हाथ की छोटी अंगुली के साथ की अंगुली में धारण करे ।

फिर लड़का इस मन्त्र को पढ़े—

[१]ओं कोऽदात् कस्माऽदात् कामोऽदात् कामायाऽदात् कामो दाता कामः प्रति-गृहीता कामैतत्ते ।

(कः) कौन (अदात्) देता है (कस्मा) किस को (अदात्) देता है (कामः) इच्छा (अदात्) देती है (कामाय) इच्छा के लिये (अदात्) देता है इसलिए (कामो दाता) इच्छा ही देने वाली है (कामः) इच्छा ही (प्रतिगृहीता) लेने वाली है इसलिए (हे काम) हे इच्छे ! एतत् यह (ते) तेरा खेल है ।

इसके बाद वर कन्या के दाएं हाथ को अंगुष्ठ सहित पकड़े और इस मन्त्र को पढ़कर कन्या का हाथ छोड़ दे और लड़की का नाम उच्चारण करे नाम के अन्त में देवी शब्द आना परमावश्यक है ।

[२]ओं यदैषि मनसा दूरं दिशोनुपवमानो वा । हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोतु । श्री (लड़की का नाम) **देवी ।**

१—कामो दाता गृहीता च कामः कामस्य साधनम् ।
कामाय सकलं तस्मात् कामः साफल्यमाप्नुयात् ॥—स्वपितृपादस्य श्लोकः

२—पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामति इति सूत्रम् ।
"गृहीतकन्याकरो वरो [illegible] ।" इयं प्रथा पंचनदप्रदेशे नास्ति ।

हे कन्ये ! (यदा) जब (मनसा) तुम्हारा चंचल चित्त (दिशा) दिशाओं के (अनु) उद्देश्य से (पवमानः) वायु की (वा[1]) तरह (दूर) बहुत दूर (एषि) चला जाता है तब (सः) वह वायु (हिरण्यपर्णः) सूर्य्य और (वैकर्णः) अग्नि ये तीनों देवता (त्वा) तुझ को (मन्सवसां) मेरे मन के अधीन (करोतु) करें ।

कन्या के पिता के पीछे दक्षिण की ओर मुख करके एक नौजवान आदमी आम्रपत्र से संयुक्त जल से भरे हुए कलश को अपने दाएं कन्धे पर अभिषेक तक चुपचाप उठाए रक्खे ।

इसके बाद कन्या का पिता कहे कि तुम दोनों आपस में देखो ऐसा कहने पर वर और कन्या आपस में देखें और देखते समय वर इन चार मन्त्रों को पढ़े—

ओं अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः । सुवर्चाः वीरसूर्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे ॥१॥

हे कन्ये ! तू (अघोरचक्षुः) सौम्य दृष्टि वाली (एधि)हो (अपतिघ्नी) पति की आज्ञा भंग करने वाली मत (भव) हो (पशुभ्यः) पशुओं की तरह आश्रित नौकरों पर (शिवा) कल्याण करने वाली हो (सुमनाः) प्रसन्न चित्त वाली हो (सुवर्चाः) तेज वाली हो (वीरसूः) वीर पुत्रों को पैदा करने वाली हो (नः) हमें (शम्) सुख देने वाली हो (द्विपदे) मनुष्यों पर तथा (चतुष्पदे) चौपायों पर (शम्) कल्याण करने वाली (भव) हो ।

ओं सोमोऽददद् गन्धर्वाय गन्धर्वोऽददग्नये रयिञ्च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ॥२॥

१—'मणी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम' इत्यत्र । त्ववार्थे व शब्दो वा शब्दो वा बोध्यः, सिद्धान्तकौमुदी ।

(सोमः[१]) चन्द्रमा ने ३० मास भोग करने के बाद (गन्धर्वाय) सूर्य के लिये (अददत्) तुमको दिया और (गन्धर्वः) सूर्य्य ने भी उतना ही समय भोग कर (अग्नये) अग्नि के लिये तुमको (अददत्) दिया और उसने भी (अथः) इसके बाद (मह्यं) मेरे लिये (इमाम्) इस कन्या को (च) और (रयिं) धन (पुत्रान्) पुत्रों (च) और धर्म को (अदात्) दिया ।

ओं सोमः प्रथमो विविधे गन्धर्वो विविद उत्तरः तृतीयोग्निष्टे पतिस्तुरीयस्ते मनुष्यजः ॥३॥

हे कन्ये[२] ! (सोमः) चन्द्रमा (ते) तेरा (प्रथमः) पहला (पतिः) है । जिसने (विविधे) तुझ को जन्म दिन से प्राप्त किया । (उत्तरः) अढ़ाई वर्ष भोगने के बाद (गन्धर्वः) सूर्य तुम्हारा अढ़ाई से पांच वर्ष तक दूसरा पति हुआ । इसके अनन्तर पांच से साढ़े सात वर्ष तक (अग्नि) अग्निदेव (ते) तेरा (तृतीयः) तीसरा (पतिः) भर्ता बना ।

वैसे ही (ते) तेरे लिये जीवन पर्यन्त (तुरीयः) चौथा (मनुष्यजः) मनुष्य से उत्पन्न हुआ मैं पति हुआ हूँ ।

ओं सा नः पूषा शिवतमा मीरयसा न ऊरू उशती विहर यस्यामुशन्तः प्रहराम शेफं यस्यामु कामा बहवो निविष्ट्यै ॥४॥

जो जगत् का चक्षु (पूषा) सूर्य्य देवता है (सा) वह इस स्त्री को (शिवतमां) कल्याण गुण शील स्वभाव वाली बनाकर (नः) हमारे प्रति

१—सोमो रूपं ददौ स्त्रीणां गन्धर्वस्तु शुभां गिराम् ।
पावकः सर्वमेध्यत्वं मेध्यावै योषितो ह्यतः ॥

२—पूर्वं स्त्रियः सुरैर्भुक्ता सोमगन्धर्ववह्निभिः ।
प्रतिपाल्याध्याप्य संशोध्य परित्यक्ता नरो भजेत् ॥

(ईरय) प्रेमवाला बनाए (सा) वह स्त्री (नः) हमारे से (उशती) सुख और पुत्रों की कामना करती हुई (ऊरू) जंघाओं को (विहर) पसारे (यस्याम्) जिस स्त्री की योनि में (उशन्तः) सुख और पुत्रों की इच्छा करने वाले हम(शेफम्)[1] लिङ्ग को (प्रहराम)प्रवेश करते हैं और (यस्याम्) जिस स्त्री में (उ) ही (बहवः)बहुत (कामाः) मनोरथ धर्म, पुत्र, रति आदि सुखों को प्राप्त करते हैं, किस लिये–(निविष्ट्यै) सायुज्य नामक मुक्ति के लिये ।

लड़के[2] का पुरोहित कुशा के बने हुए पूले को लेकर उसे अग्नि की तीन प्रदक्षिणा करा कर वर और कन्या के पैरों के नोचे रख दे ।

वर अरघे में जल पुष्प सुपारी इलायची दक्षिणा और मौली (कलावा) की (तन्तु) को डाले और पंडित ब्रह्मा की वर्णी का संकल्प[3] पढ़े—

ओं अद्य कर्तव्य विवाह होम कर्मणि कृताकृता वेक्षण रूप ब्रह्म कर्म कर्तुम् (गोत्र का नाम) **गोत्रम्** (ब्राह्मण का नाम) **शर्माणं ब्राह्मणमेभिः पुष्प चन्दन ताम्बूल वासोभिर्ब्रह्मत्वेन त्वामहं वृणे ।**

वर मौली की तन्द को लेकर ब्राह्मण के दाएं हाथ में बांधे और बांधते समय ब्राह्मण इस मन्त्र को पढ़े ।

ओं व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥

१—पुच्छे शेफंच लिंगे तु शेफं केशे भगे तथा ।
भगलिंगोद्भवे केशे शष्पन्तु समुदीरितम् ॥ इति केशवचनम् ।

२—ततोऽग्निं प्रदक्षिणीकृत्य पश्चादग्नेरहतवस्त्रवेष्टिततृणपुलके कटे वा दक्षिणपादं दत्त्वा वधूं दक्षिणतः कृत्वा तामुपवेश्य स्वयमुपविशेत् ।
परन्तु इयं प्रथा अस्मिन् पंचनद प्रान्ते नास्ति ।
केचिद् अत्र मनसा त्रिः प्रदक्षिणा कर्तव्या इत्याम्नन्ति ।

३—संकल्प एव मुख्यः स्यात् स्नानदानादिकर्मसु ।
कर्म संकल्परहित तत् सर्वं निष्फलं भवेत् ॥ कात्यायनः

वर ब्राह्मण को दक्षिणा और सुपारी इत्यादि दे दे और ब्राह्मण कहे—

ओं वृतोस्मि ।

वर ब्राह्मण को कहे—**यथा विहितं कर्म कुरु ।**

ब्राह्मण कहे—**करवाणि ।**

फिर वर दोबारा अरघे में जल पुष्प सुपारी इलायची दक्षिणा और मौली की तन्द डाले और पंडित होता की वर्णी का संकल्प पढ़े ।

ओं अद्य कर्तव्य विवाह होम कर्मणि होतृ कर्म कर्तुम् (गोत्र का नाम) **गोत्रम्** (ब्राह्मण का नाम) **शर्माणं ब्राह्मणमेभिः पुष्पचन्दन ताम्बूल वासोभिर्होतृत्वेन त्वामहं वृणे ।**

वर मौली की यन्द लेकर होता के दाएं हाथ में बांधे और बांधते समय होता इस मन्त्र को पढ़े—

ओं व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥

वर होता को दक्षिणा और सुपारी इत्यादि देवे और होता कहे—

ओं वृतोस्मि ।

फिर वर होता को कहे—**यथा विहितं कर्म कुरु ।**

होता कहे—**करवाणि ।**

ततोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा, तदुपरि प्रागग्रान् कुशानास्तीर्य्य, ब्रह्माण-मग्नि-प्रदक्षिण-क्रमेणानीय, अत्र त्वं मे ब्रह्मा भवेत्यभिधाय

कल्पितासने उपवेशयेत्। ततः प्रणीतापात्रं पुरतः कृत्वा, वारिणा परिपूर्य, कुशैराच्छाद्य, ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात्॥

इसके बाद अग्नि के दक्षिण[1] की तरफ, शुद्ध आसन[2] को देकर, उसके ऊपर पूर्व की तरफ है अगला भाग जिनका, ऐसी कुशाओं को बिछा कर ब्रह्मा को अग्नि की प्रदक्षिणा कराकर ले आए। यहाँ 'आप मेरे इस विवाह

१—दक्षिणतो ब्रह्मासनमास्तीर्य्य इति सूत्रम्।
यमो वैवस्वतो राजा वसति दक्षिणदिशि।
तस्मात् संरक्षणार्थं हि ब्रह्मा तिष्ठति दक्षिणे।

२—चटकाधानन्यायेन बहुत्वेऽपि त्रिभिः कुशैराच्छादयेत्।
ब्रह्माचार्य्यप्रणीतानामासनं च त्रिभिः कुशैः।
य द्वाभ्यां नैकदर्भेण ऋषयो बहवो विदुः॥ इत्यग्निगृह्ये।
यजमानः शुचिः स्नातः श्रद्धायुक्तो जितेन्द्रियः।
पादशौचार्घवस्त्राद्यै राचार्यादीन् समर्चयेत्॥ वसिष्ठवचनम्।
द्वादशांगुलदीर्घेण चतुरस्रः सगर्तकः।
प्रस्थमात्रोदकग्राही प्रणीता चमसो भवेत्॥ कुशकण्डिकाभाष्ये।
कुशाऽलाभे काशादयः गृहीतव्या इति वैदिकन्यायम्।
कृमिकीटपतंगाश्च विचरन्ति महीतले।
तेषां संरक्षणार्थाय परिसमुह्येति कथ्यते॥ बादरायणः।
पुरा इन्द्रेण वज्रेण हतो राजा महासुरः।
व्यापिता मेदसा पृथ्वी तदर्थमुपलेपनम्॥ आचार्य्यः।
फलेन फलमाप्नोति पुष्पेण श्रियमृच्छति।
पत्रेण धनलाभश्च दीर्घमायुः कुशेन तु॥ संग्रहकारे त्रिरेखाकरणम्।
ये भ्रमन्ति पिशाचाद्या आकाशस्य तु वामतः।
तेषां प्रहरणार्थाय उद्धृत्य कथितं नरैः॥ बादरायणः।
अग्निमानीय पात्रे तु प्रक्षिपेदक्षतोदकम्।
यद्येवं नैव कुर्वीत यजमानभयावहम्॥
इत्यादीनि कार्य्याणि पूर्वं कृत्वा वरपुरोहितः कुशकण्डिकां आरभेत्।

में ब्रह्मा बनो ऐसा कह कर, कल्पित आसन पर ब्रह्मा को बिठलाए। इसके बाद प्रणीतापात्र को उनके आगे रख कर, उसे जल से भर कर, कुशाग्रों से ढांप कर ब्रह्मा के मुख को देख कर अग्नि के उत्तर की तरफ कुशा के ऊपर रख दे।

(ततः परिस्तरणं) बर्हिषश्चतुर्थ-भाग-मादाय आग्नेय्यादीशानांतं ब्रह्मणोग्नि-पर्यंतं नैर्ऋत्याद् वायव्यांतम् अग्निः प्रणीतापर्यंतं ततोग्ने-रुत्तरतः पश्चिम-दिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्र-करणार्थं साग्रमनंतर्गर्भ-कुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली-संमार्जनार्थं-कुशत्रयम् उपयमनार्थं वेणीरूप-कुशत्रयं समिधस्तिस्रः स्रुवः आज्यं षट् पंचाश-दुत्तर-वर-मुष्टि-शत-द्वया-वच्छिन्नं तंडुल-पूर्णपात्रम्।

(इसके बाद कुशा को अग्नि के चारों तरफ बिछाना) ६४ के चतुर्थ भाग १६ कुशाग्रों को लेकर, अग्नि कोण से ईशानकोण तक ४ कुशा धरे। ब्रह्मा से अग्नि तक ४ कुशा धरे। नैर्ऋतकोण से वायुकोण तक ४ कुशा धरे। अग्नि से प्रणीता तक ४ कुशा रख देवे। इसके बाद अग्नि से उत्तर की तरफ पश्चिम दिशा में, पवित्र छेदन के लिये तीन कुशा रखे। पवित्रा बनाने के लिये अग्रभाग सहित और बीच के पत्ते से रहित ऐसे दो कुशपत्र प्रोक्षणीपात्र, घी का बरतन[1], संमार्जन के लिये तीन कुशा, उपयमन के लिये

१—आज्यस्थाली तैजसी मृत्मयी वा।
आज्यस्थाली मृन्मयी वा प्रकर्तव्याग्निकर्मसु।
आज्यस्थालीप्रमाण वै यथाकाम तु कारयेत्॥ कर्मप्रदीप

वेणी रूप तीन कुशा, तीन समिधा,[१] स्रुवा,[२] घी,[३] वर के २५६ मुट्ठी प्रमाण चावलों से भरा हुआ पात्र[४] ।

१—न जीर्णा द्विदला ह्रस्वा वक्राः सशिखराः कुशाः ।
दीर्घाः स्थूला घुणैर्जुष्टाः कर्मसिद्धिविनाशकाः ।। मरीचिः
स्थूलया ह्रीयते लक्ष्मीः कृशया जायते क्षयः ।
द्विधया नेत्ररोगः स्यात् कीटदंष्टार्थनाशिनी ।।
द्वेषं प्रकुर्वते दीर्घा प्राणघ्ना निस्त्वचः स्मृताः ।
सक्षीरा नाधिका नोनाः समिधः सर्वकामदाः ।।
आर्द्राः सत्वक् समाविद्धा तर्जन्यंगुलवर्तुलाः ।
ईदृशीं होमयेत् प्राज्ञः प्राप्नोति विपलां श्रियम् ।।
श्रौते स्मार्ते च तत्रोक्ताः समिधः परिकीर्तिताः ।
पलाशफल्गुन्यग्रोधाः प्लक्षाश्वत्थविकङ्कताः
उदुम्बरास्तथा विल्वो चन्दना यज्ञिपाश्च ये ।।
समिदर्थे प्रशस्तास्तु एते वृक्षा विशेषतः ।
सरलो देवादारुश्च शालश्च खदिरस्तथा ।
बब्बुलं विहाय ग्राह्याः कण्टकिन इत्येके ।
२—खादिरेण स्रुवः कार्यः पालाशेन जुहुर्भवेत् ।।
तदभावे पलाशस्य पर्णाभ्यां हूयते हविः ।
पलाशपर्णाभावे तु पर्णैर्वा पिप्पलोदभवैः ।। कुशकण्डिकाभाष्ये ।
'खादिरः स्रुवः' कात्यायनश्रौतसूत्रम् ।
३—आज्यार्थे गोघृतं ग्राह्यं तदभावे च तैलमपि इष्यते । गोमिलाचार्य्यः ।
उत्तम गोघृतं ज्ञेयं मध्यमं महिषीघृतम् ।
अधमं छागलीजातं तस्माद् गव्यं प्रशस्यते ।। पिंगलमतम् ।
आज्याभावे गृहीतव्यं सतैल तिलसंभम् ।
तदभावे यवव्रीहिश्यामकान्यतमो भवेत् ।।
घृतं वा यदि वा तैलं पयो वा दधि पावकम् ।
आज्यस्थाने नियुक्तानामाज्यशब्दो विधीयते ।।
४—अष्टमुष्टिर्भवेत् कुञ्चः कुञ्चाष्टौ च पुष्कलम् ।
पुष्पकलानि च चत्वारि पूर्णपात्रस्य लक्षणम् ।।
बहुभोक्तृपुरुषाहारपरिमितं तण्डुलाद्यन्नं पूर्णपात्रमिति हरिहरभाष्ये ।

पवित्रछेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयम्। अथ तस्यामेव दिशि असाधारण-वस्तून्युपकल्पनीयानि तत्र शमीपलाशमिश्रा लाजा दृषद्रुपलं कुमारी भ्राता शूर्पः दृढपुरुषः अन्यदपि युक्तमालेपनादि द्रव्यम्। ततः पवित्रछेदनकुशैः पवित्रे छित्त्वा सपवित्रकरेण प्रणीतोदकं त्रिःप्रोक्षणीपात्रे निधाय अनामिकांगुष्ठाभ्यां उत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं ततः प्रोक्षणीपात्रस्य सव्यहस्तकरणम्, अनामिकांगुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्दिंगनं प्रणीतोदकेन प्रोक्षणी प्रोक्षणम्।

इन सब वस्तुओं को पवित्रछेदन की कुशाओं से आगे पूर्व पूर्व की तरफ़ क्रम से रखता जाए। इसके बाद उसी दिशा में इन ज़रूरी वस्तुओं को भी इकट्ठा करे। वे ये हैं। जंडी के पत्तों[1] से मिली हुई फुल्लियां[2], पत्थर[3], लड़की के भाई, छाज, कोई ऋष्टपुष्ट पुरुष तथा और भी उस विवाह के योग्य आलेपनादि द्रव्य रखे। फिर पवित्रा बनाने वाली कुशाओं से पवित्रे[4] को बना कर, पवित्रा सहित प्रणीता के जल को हाथ में लेकर तीन वार प्रोक्षणीपात्र में डाले। अनामिका और अंगुष्ट इन से पवित्रों के अग्रभाग को आगे करके ग्रहण करे। इसके बाद प्रोक्षणीपात्र का जल तीन बार ऊपर

---

१ शमी शमयति रोगान् इति शमी।

२ लाजाः लज्यन्ते भृज्यन्ते इति लाजाः।

३ विस्तारो दृषदः प्रोक्तो द्वादशाङ्गुलसंख्यया। हरिहरभाष्ये।

४—पवित्रं द्विदलं प्रोक्तं ब्रह्मग्रन्थिसमन्वितम्।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्।

को उछाले। प्रोक्षणीपात्र को वांएँ हाथ में रखकर दाहिने हाथ की अनामिका और अंगुष्ठ से पवित्रों को ग्रहण कर तीन वार जल को ऊपर की तरफ़ फैंके। इसके बाद प्रणीता के जल से प्रोक्षणीपात्र को सिंचन करे।

ततः प्रोक्षणीजलेन यथासादित-वस्तु-सेचनं ततोऽग्नि-प्रणीतयोर्मध्ये प्रोक्षणीपात्र-निधानम्, आज्यस्थाल्या-माज्य-निर्वापः ततोऽधिश्रयणं ततो ज्वलित-तृणादिना हविर्वेष्टयित्वा प्रदक्षिणक्रमेण पर्यग्निकरणं ततः स्रुवप्रतपनं कृत्वा संमार्जन-कुशाना-मग्रै-रंतरतो मूलैर्बाह्यतः स्रुव-संमार्जनं प्रणीतोदकेनाभ्युक्ष्य पुनः प्रताप्य स्रुवं दक्षिणतो निदध्यात् आज्यस्याग्नेरवतारणम्।

